# SHRIMAD BHAGWAT RASIK KUTUMBA

श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

## Prahlad Stuti



उग्र रूप धर प्रगटे नरसिंह, रखने को प्रिय भक्त की लाज।
सुनकर स्तुति दितिपौत्र के मुख से, अंक में बैठाए प्रह्लाद।।

**नारायणं(न्) नमस्कृत्य, नरं(ञ्) चैव नरोत्तमम्।**
**देवीं(म्) सरस्वतीं(वँ) व्यासं(न्), ततो जयमुदीरयेत्**

**nārāyaṇaṃ(n) namaskṛtya, naraṃ(ñ)caiva narottamam**

**devīṃ(m) sarasvatīṃ(v̐) vyāsaṃ(n), tato jayamudīrayet**

**नामसङ्कीर्तनं(यँ) यस्य, सर्वपापप्रणाशनम्।**
**प्रणामो दुःखशमनस्, तं(न्) नमामि हरिं(म्) परम्**

**nāmasaṅkīrtanaṃ(y̐) yasya, sarvapāpapraṇāśanam**

**praṇāmo duḥkhaśamanas, taṃ(n) namāmi hariṃ(m) param**

**श्रीमद्भागवतमहापुराणम्**
**सप्तमः स्कन्धः**
**॥ अथ नवमोऽध्यायः ॥**

**Śrīmadbhāgawatamahāpurāṇam**

**Saptamaḥ skandhaḥ**

**.. navamo'dhyāyaḥ - 9 ..**

**नारद उवाच**
**एवं(म्) सुरादयः(स्) सर्वे, ब्रह्मरुद्रपुरः(स्)सराः ।**
**नोपैतुमशकन्मन्यु-सं(म्)रम्भं(म्) सुदुरासदम् ॥ 1॥**

nārada uvāca

evaṃ(m) surādayaḥ(s) sarve, brahmarudrapuraḥ(s)sarāḥ .

nopaitumaśakanmanyu- saṃ(s)rambhaṃ(m) sudurāsadam .. 1..

brahma+rudra+puraḥ(s)+sarāḥ, nopai+tuma+śakan+ manyu

साक्षाच्छ्रीः(फ्) प्रेषिता देवैर्- दृष्ट्वा तन्महदद्भुतम् ।

अदृष्टाश्रुतपूर्वत्वात्, सा नोपेयाय शङ्किता ॥ 2॥

sākṣācchrīḥ(ph) preṣitā devair- dṛṣṭvā tanmahadadbhutam .

adṛṣṭāśrutapūrvatvāt, sā nopeyāya śaṅkitā .. 2..

tan+ maha+ dad+ bhutam, adṛṣṭā+ śruta+ pūrvat+ vāt

प्रह्लादं(म्) प्रेषयामास, ब्रह्मावस्थितमन्तिके ।

तात प्रशमयोपेहि, स्वपित्रे कुपितं(म्) प्रभुम् ॥ 3॥

prahlādaṃ(m) preṣayāmāsa, brahmāvasthitamantike .

tāta praśamayopehi, svapitre kupitaṃ(m) prabhum .. 3..

brahmā+ vasthita+ mantike, praśa+ mayopehi

तथेति शनकै राजन्- महाभागवतोऽर्भकः ।

उपेत्य भुवि कायेन, ननाम विधृताञ्जलिः ॥ 4॥

tatheti śanakai rājan- mahābhāgavato'rbhakaḥ .

upetya bhuvi kāyena, nanāma vidhṛtāñjaliḥ .. 4..

mahā+ bhāgavato'r+ bhakaḥ, vidhṛtāñ+ jaliḥ

स्वपादमूले पतितं(न्) तमर्भकं(वँ),

विलोक्य देवः(ख्) कृपया परिप्लुतः ।

उत्थाप्य तच्छीर्ष्ण्यदधात् कराम्बुजं(ङ्),

कालाहिवित्रस्तधियां(ङ्) कृताभयम् ॥ 5॥

svapādamūle patitaṃ(n) tamarbhakaṃ(v̐)

vilokya devaḥ(kh) kṛpayā pariplutaḥ .

utthāpya tacchīrṣṇyadadhāt karāmbujaṃ(ṅ)

kālāhivitrastadhiyāṃ(ṅ) kṛtābhayam .. 5..

tacchīrṣṇya+ dadhāt, kālāhi+ vitras+ tadhiyāṃ(ṅ)

स तत्करस्पर्शधुताखिलाशुभः(स्),
सपद्यभिव्यक्तपरात्मदर्शनः ।
तत्पादपद्मं(म्) हृदि निर्वृतो दधौ,
हृष्यत्तनुः(ख्) क्लिन्नहृदश्रुलोचनः ॥ 6॥

sa tatkarasparśadhutākhilāśubhaḥ(s)
sapadyabhivyaktaparātmadarśanaḥ .
tatpādapadmaṃ(m) hṛdi nirvṛto dadhau
hṛṣyattanuḥ(kh) klinnahṛdaśrulocanaḥ .. 6..

tat+ karasparśa+ dhutā+ khilāśubhaḥ(s)
sapadya+ bhivyakta+ parāt+ madarśanaḥ
hṛṣyat+ tanuḥ(kh), kiln+ nahṛda+ śrulocanaḥ

अस्तौषीद्धरिमेकाग्र-मनसा सुसमाहितः ।
प्रेमगद्गदया वाचा, तन्न्यस्तहृदयेक्षणः ॥ 7॥

astauṣīddharimekāgra- manasā susamāhitaḥ .
premagadgadayā vācā, tannyastahṛdayekṣaṇaḥ .. 7..

astauṣīd+ dharime+ kāgra, tannyas+ tahṛdaye+ kṣaṇaḥ

प्रह्लाद उवाच

ब्रह्मादयः(स्) सुरगणा मुनयोऽथ सिद्धाः(स्),
सत्त्वैकतानमतयो वचसां(म्) प्रवाहैः ।
नाराधितुं(म्) पुरुगुणैरधुनापि पिप्रुः(ख्),
किं(न्) तोष्टुमर्हति स मे हरिरुग्रजातेः ॥ 8॥

prahlāda uvāca

brahmādayaḥ(s) suragaṇā munayo'tha siddhāḥ(s)
sattvaikatānamatayo vacasāṃ(m) pravāhaiḥ .

nārādhitum̩(m) puruguṇairadhunāpi pipruḥ(kh)

kiṃ(n) toṣṭumarhati sa me harirugrajāteḥ .. 8..

sattvai+ kata+ namatayo, puruguṇai+ radhunāpi

मन्ये धनाभिजनरूपतपः(श्)श्रुतौजस्-

तेजः(फ्)प्रभावबलपौरुषबुद्धियोगाः ।

नाराधनाय हि भवन्ति परस्य पुं(म्)सो,

भक्त्या तुतोष भगवान्गजयूथपाय ॥ 9॥

manye dhanābhijanarūpatapaḥ(ś)śrutaujas

tejaḥ(ph)prabhāvabalapauruṣabuddhiyogāḥ .

nārādhanāya hi bhavanti parasya puṃ(m)so

bhaktyā tutoṣa bhagavāngajayūthapāya .. 9..

dhanā+ bhijanarū+ patapaḥ(ś)+ śrutaujaḥ

tejaḥ(ph)+ prabhā+ vabalapau+ ruṣabuddhi+ yogāḥ,

bhagavān+ gajayū+ thapāya

विप्राद् द्विषड्गुणयुतादरविन्दनाभ-

पादारविन्दविमुखाच्छ्वपचं(वँ) वरिष्ठम् ।

मन्ये तदर्पितमनोवचनेहितार्थ-

प्राणं(म्) पुनाति स कुलं(न्) न तु भूरिमानः ॥ 10॥

Viprād dviṣāḍguṇayutādaravindanābha-

pādāravindavimukhācchvapacaṃ(ṽ) variṣṭham .

manye tadarpitamanovacanehitārtha-

prāṇaṃ(m) punāti sa kulaṃ(n) na tu bhūrimānaḥ .. 10..

dviṣaḍ+ guṇayutā+ daravin+ danābha

pādā+ ravin+ davimukhāc+ chvapacaṃ(ṽ),

tadarpi+ tamano+ vacane+ hitārtha

नैवात्मनः(फ्) प्रभुरयं(न्) निजलाभपूर्णो,

मानं(ञ्) जनादविदुषः(ख्) करुणो वृणीते ।

यद् यज्जनो भगवते विदधीत मानं(न्),
तच्चात्मने प्रतिमुखस्य यथा मुखश्रीः ॥ 11॥

naivātmanaḥ(ph) prabhurayaṃ(n) nijalābhapūrṇo
mānaṃ(ñ) janādaviduṣaḥ(kh) karuṇo vṛṇīte .
yad yajjano bhagavate vidadhīta mānaṃ(n)
taccātmane pratimukhasya yathā mukhaśrīḥ .. 11..

janā+ daviduṣaḥ(kh)

तस्मादहं(वँ) विगतविक्लव ईश्वरस्य,
सर्वात्मना महि गृणामि यथामनीषम् ।
नीचोऽजया गुणविसर्गमनुप्रविष्टः(फ्),
पूयेत येन हि पुमाननुवर्णितेन ॥ 12॥

tasmādahaṃ(v̐) vigataviklava īśvarasya
sarvātmanā mahi gṛṇāmi yathāmanīṣam .
nīco'jayā guṇavisargamanupraviṣṭaḥ(ph)
pūyeta yena hi pumānanuvarṇitena .. 12..

vigata+ viklava, guṇavisarga+ manu+ praviṣṭaḥ(ph),
puma+ nanu+ varṇitena

सर्वे ह्यमी विधिकरास्तव सत्त्वधाम्नो,
ब्रह्मादयो वयमिवेश न चोद्विजन्तः ।
क्षेमाय भूतय उतात्मसुखाय चास्य,
विक्रीडितं(म्) भगवतो रुचिरावतारैः ॥ 13॥

sarve hyamī vidhikarāstava sattvadhāmno
brahmādayo vayamiveśa na codvijantaḥ .
kṣemāya bhūtaya utātmasukhāya cāsya
vikrīḍitaṃ(m) bhagavato rucirāvatāraiḥ .. 13..

vidhikarās+ tava, cod+ vijantaḥ, utāt+ masukhāya

तद् यच्छ मन्युमसुरश्च हतस्त्वयाद्य,
मोदेत साधुरपि वृश्चिकसर्पहत्या ।
लोकाश्च निर्वृतिमिताः(फ्) प्रतियन्ति सर्वे,
रूपं(न्) नृसिं(म्)ह विभयाय जनाः(स्) स्मरन्ति ॥ 14॥

tad yaccha manyumasuraśca hatastvayādya
modeta sādhurapi vṛścikasarpahatyā .
lokāśca nirvṛtimitāḥ(ph) pratiyanti sarve
rūpaṃ(n) nṛsiṃ(m)ha vibhayāya janāḥ(s) smaranti .. 14..

manyu+ masuraśca, hatas+ tvayādya, vṛści+ kasarpa+ hatyā

नाहं(म्) बिभेम्यजित तेऽतिभयानकास्य-
जिह्वार्कनेत्रभ्रुकुटीरभसोग्रदं(म्)ष्ट्रात् ।
आन्त्रस्रजः क्षतजकेसरशङ्कुकर्णान्-
निर्ह्रादभीतदिगिभादरिभिन्नखाग्रात् ॥ 15॥

nāhaṃ(m) bibhemyajita te'tibhayānakāsya-
jihvārkanetrabhrukuṭīrabhasogradaṃ(m)ṣṭrāt .
āntrasrajaḥ kṣatajakesaraśaṅkukarṇān-
nirhrādabhītadigibhādaribhinnakhāgrāt .. 15..

jihvārka+ netra+ bhrukuṭī+ rabhasogra+ daṃ(m)ṣṭrāt .
āntras+ rajaḥ, kṣata+ jakesa+ raśaṅ+ kukarṇān,
nirhrā+ dabhīta+ digibhā+ daribhin+ nakhāgrāt

त्रस्तोऽस्म्यहं(ङ्) कृपणवत्सल दुः(स्)सहोग्र-
सं(म्)सारचक्रकदनाद् ग्रसतां(म्) प्रणीतः ।
बद्धः(स्) स्वकर्मभिरुशत्तम तेऽङ्घ्रिमूलं(म्),
प्रीतोपवर्गशरणं(म्) ह्वयसे कदा नु ॥ 16॥

trasto'smyahaṃ(ṅ) kṛpaṇavatsala duḥ(s)sahogra-
saṃ(m)sāracakrakadanād grasatāṃ(m) praṇītaḥ .

b*addhaḥ(s) svakarmabhiruśattama te'ṅghrimūlaṃ(m)

prītopavargaśaraṇaṃ(m) hvayase kadā nu .. 16..

saṃ(m)sā+ racakra+ kadanād, svakarma+ bhiruśat+ tama

य*स्मात् प्रियाप्रियवियोगसयोगज*न्म-

शोकाग्निना सकलयोनिषु दह्यमानः ।

दुःखौषधं(न्) तदपि दुःखमत*द्धियाहं(म्),

भूमन्भ्रमामि वद मे तव दास्ययोगम् ॥ 17 ॥

y*asmāt priyāpriyaviyogasayogaj*anma-

śokāgninā sakalayoniṣu dahyamānaḥ .

duḥkhauṣadhaṃ(n) tadapi duḥkhamat*addhiyāhaṃ(m)

bhūmanbhramāmi vada me tava dāsyayogam .. 17..

priyāpriya+ viyo+ gasayo+ gajanma, duḥkha+ matad+ dhiyāhaṃ(m)

सोऽहं(म्) प्रिय*स्य सुहृदः(फ्) परदेवताया,

लीलाकथास्तव नृसिं(म्)ह विरि*ञ्चगीताः ।

अ*ञ्ज*स्तितर्म्यनुगृण*न्गुणवि*प्रमु*क्तो,

दुर्गाणि ते पदयुगालयहं(म्)ससङ्*गः ॥ 18 ॥

so'haṃ(m) pr*iyasya suhṛdaḥ(ph) paradevatāyā

līlākathāstava nṛsiṃ(m)ha vir*iñcagītāḥ .

*āñj*astitarmyanugṛṇ*anguṇav*ipram*ukto

durgāṇi te padayugālayahaṃ(m)sas*aṅgaḥ .. 18..

añjasti+ tarmya+ nugṛṇan+ guṇa+ vipramukto,

padayugā+ laya+ haṃ(m)sa+ saṅgaḥ

बाल*स्य नेह शरणं(म्) पितरौ नृसिं(म्)ह,

नार्त*स्य चागदमुद*न्वति म*ज्जतो नौः ।

त*प्त*स्य तत्प्रतिविधिर्य इहाञ्जसे*ष्ट*स्-

तावद् विभो तनुभृतां(न्) त्वदुपेक्षितानाम् ॥ 19 ॥

bālasya neha śaraṇam(m) pitarau nṛsiṃ(m)ha

nārtasya cāgadamudanvati majjato nauḥ .

taptasya tatpratividhirya ihāñjaseṣṭas-

tāvad vibho tanubhṛtāṃ(n) tvadupekṣitānām .. 19..

cā+ gadamudan+ vati, tat+ pratividhirya

यस्मिन्यतो यर्हि येन च यस्य यस्माद्,

यस्मै यथा यदुत यस्त्वपरः(फ्) परो वा ।

भावः(ख्) करोति विकरोति पृथक्स्वभावः(स्),

सञ्चोदितस्तदखिलं(म्) भवतः(स्) स्वरूपम् ॥ 20॥

yasmin yato yarhi yena ca yasya yasmād-

yasmai yathā yaduta yastvaparaḥ(ph) paro vā .

bhāvaḥ(kh) karoti vikaroti pṛthaksvabhāvaḥ(s)

sañcoditastadakhilaṃ(m) bhavataḥ(s) svarūpam .. 20..

yas+tvaparaḥ(ph), pṛthak+ svabhāvaḥ(s),

sañ+ coditas+ tadakhilaṃ(m)

माया मनः(स्) सृजति कर्ममयं(म्) बलीयः(ख्),

कालेन चोदितगुणानुमतेन पुं(म्)सः ।

छन्दोमयं(यँ) यदजयार्पितषोडशारं(म्),

सं(म्)सारचक्रमज कोऽतितरेत् त्वदन्यः ॥ 21॥

māyā manaḥ(s) sṛjati karmamayaṃ(m) balīyaḥ(kh)

kālena coditaguṇānumatena puṃ(m)saḥ .

chandomayaṃ(ỹ) yadajayārpitaṣoḍaśāraṃ(m)

saṃ(m)sāracakramaja ko'titaret tvadanyaḥ .. 21..

co+ ditaguṇā+ numatena, yadajayār+ pitaṣo+ ḍaśāraṃ(m)

स त्वं(म्) हि नित्यविजितात्मगुणः(स्) स्वधाम्ना,

कालो वशीकृतविसृज्यविसर्गशक्तिः ।

चक्रे विसृष्टमजयेश्वर षोडशारे,
निष्पीड्यमानमुपकर्ष विभो प्रपन्नम् ॥ 22॥

sa tvaṃ(m) hi nityavijitātmaguṇaḥ(s) svadhāmnā
kālo vaśīkṛtavisṛjyavisargaśaktiḥ .
cakre visṛṣṭamajayeśvara ṣoḍaśāre
niṣpīḍyamānamupakarṣa vibho prapannam .. 22..

nitya+ vijitāt+ maguṇaḥ(s), vaśī+ kṛtavisṛjya+ visarga+ śaktiḥ
visṛṣṭa+ majayeśvara, niṣpīḍyamā+ namupakarṣa

दृष्टा मया दिवि विभोऽखिलधिष्ण्यपाना-
मायुः(श्) श्रियो विभव इच्छति यान्जनोऽयम् ।
येऽस्मत्पितुः(ख्) कुपितहासविजृम्भितभ्रू-
विस्फूर्जितेन लुलिताः(स्) स तु ते निरस्तः ॥ 23॥

dṛṣṭā mayā divi vibho'khiladhiṣṇyapānā-
māyuḥ(ś) śriyo vibhava icchati yān jano'yam .
ye'smatpituḥ(kh) kupitahāsavijṛmbhitabhrū-
visphūrjitena lulitāḥ(s) sa tu te nirastaḥ .. 23..

vibho'+ khiladhiṣṇya+ pānā,
kupitahā+ savijṛm+ bhitabhrū

तस्मादमूस्तनुभृतामहमाशिषो ज्ञ,
आयुः(श्) श्रियं(वँ) विभवमैन्द्रियमाविरिञ्चात् ।
नेच्छामि ते विलुलितानुरुविक्रमेण,
कालात्मनोपनय मां(न्) निजभृत्यपार्श्वम् ॥ 24॥

tasmādamūstanubhṛtāmahamāśiṣo jña
āyuḥ(ś) śriyaṃ(v̐) vibhavamaindriyamāviriñcyāt .
necchāmi te vilulitānuruvikrameṇa
kālātmanopanaya māṃ(n) nijabhṛtyapārśvam .. 24..

tasmā+ damūs+ tanubhṛtā+ mahamā+ śiṣo,

vibhavamain+ driyamā+ viriñcyāt

vilulitā+ nuru+ vikrameṇa, nija+ bhṛtya+ pārśvam

*कुत्राशिषः(श्) श्रुतिसुखा मृगतृ*ष्णिरूपाः(ख्),
क्वेदं(ङ्) कलेवरमशेषरुजां(वँ्) वि*रोहः ।
निर्वि*द्यते न तु जनो यदपीति विद्वान्,
कामानलं(म्) मधुलवैः(श्) शमय*न्दुरापैः ॥ 25॥

ku*trāśiṣaḥ(ś) śrutisukhā mṛgatṛ*ṣṇirūpāḥ(kh)
kvedaṃ(ṅ) kalevaramaśeṣarujāṃ(ṽ) virohaḥ .
nirvi*dyate na tu jano yadapīti vi*dvān
kāmānalaṃ(m) madhulavaiḥ(ś) śamaya*ndurāpaiḥ .. 25..

mṛga+ tṛṣṇi+ rūpāḥ(kh),

kale+ varamaśe+ ṣarujāṃ(ṽ)

क्वाहं(म्) रजः(फ्)प्रभव ईश तमोऽधिकेऽस्मिन्,
जातः(स्) सुरेतरकुले क्व तवानुक*म्पा ।
न* ब्रह्मणो न तु भव*स्य न वै रमाया,
य*न्मेऽर्पितः(श्) शिरसि प*द्मकरः(फ्) प्रसादः ॥ 26॥

kvāhaṃ(m) rajaḥ(ph)prabhava īśa tamo'dhike'smin
jātaḥ(s) suretarakule kva tavānuka*mpā .
na* brahmaṇo na tu bhava*sya na vai ramāyā
ya*nme'rpitaḥ(ś) śirasi pa*dmakaraḥ(ph) prasādaḥ .. 26..

tamo'+ dhike's+ min

नैषा परावरमतिर्भवतो नन*ु स्याज्-
ज*न्तोर्यथाऽऽत्मसुहृदो जगत*स्तथापि ।
सं(म्)सेवया सुरतरोरिव ते प्रसादः(स्),
सेवानुरूपमुदयो न परावर*त्वम् ॥ 27॥

naiṣā parāvaramatirbhavato nanu syāj-

jantoryathā''tmasuhṛdo jagatastathāpi .

saṃ(m)sevayā surataroriva te prasādaḥ(s)

sevānurūpamudayo na parāvaratvam .. 27..

parāva+ ramatir+ bhavato,

jantor+ yathā''t+ masuhṛdo

एवं(ञ्) जनं(न्) निपतितं(म्) प्रभवाहिकूपे,

कामाभिकाममनु यः(फ्) प्रपतन्प्रसङ्गात् ।

कृत्वाऽऽत्मसात् सुरर्षिणा भगवन् गृहीतः(स्),

सोऽहं(ङ्) कथं(न्) नु विसृजे तव भृत्यसेवाम् ॥ 28॥

evaṃ(ñ) janaṃ(n) nipatitaṃ(m) prabhavāhikūpe

kāmābhikāmamanu yaḥ(ph) prapatanprasaṅgāt .

kṛtvā''tmasāt surarṣiṇā bhagavan gṛhītaḥ(s)

so'haṃ(ṅ) kathaṃ(n) nu visṛje tava bhṛtyasevām .. 28..

kṛtvā''t+ masāt

मत्प्राणरक्षणमनन्त पितुर्वधश्च,

मन्ये स्वभृत्यऋषिवाक्यमृतं(वँ) विधातुम् ।

खड्गं(म्) प्रगृह्य यदवोचदसद्विधित्सुस्-

त्वामीश्वरो मदपरोऽवतु कं(म्) हरामि ॥ 29॥

matprāṇarakṣaṇamananta piturvadhaśca

manye svabhṛtyarṣivākyamṛtaṃ(ṽ) vidhātum .

khaḍgaṃ(m) pragṛhya yadavocadasadvidhitsus-

tvāmīśvaro madaparo'vatu kaṃ(m) harāmi .. 29..

matprāṇa+ rakṣaṇa+ mananta,

pitur+ vadhaśca , svabhṛtya+ ṛṣi+ vākya+ mṛtaṃ(ṽ),

yadavo+ cadasad+ vidhitsus

एकस्त्वमेव जगदेतदमुष्य यत् त्व-
माद्यन्तयोः(फ्) पृथगवस्यसि मध्यतश्च ।
सृष्ट्वा गुणव्यतिकरं(न्) निजमाययेदं(न्),
नानेव तैरवसितस्तदनुप्रविष्टः ॥ 30॥

ekastvameva jagadetamamuṣya yat tva-
mādyantayoḥ(ph) pṛthagavasyasi madhyataśca .
sṛṣṭvā guṇavyatikaraṃ(n) nijamāyayedaṃ(n)
nāneva tairavasitastadanupraviṣṭaḥ .. 30..

jagade+tamamuṣya, pṛtha+ gavas+ yasi,
tai+ ravasitas+ tadanu+ praviṣṭaḥ

त्वं(वँ) वा इदं(म्) सदसदीश भवां(म्)स्ततोऽन्यो,
माया यदात्मपरबुद्धिरियं(म्) ह्यपार्था ।
यद् यस्य जन्म निधनं(म्) स्थितिरीक्षणं(ञ्) च,
तद् वै तदेव वसुकालवदष्टितर्वोः ॥ 31॥

tvaṃ(v̐) vā idaṃ(m) sadasadīśa bhavāṃ(m)stato'nyo
māyā yadātmaparabuddhiriyaṃ(m) hyapārthā .
yad yasya janma nidhanaṃ(m) sthitirīkṣaṇaṃ(ñ) ca
tad vai tadeva vasukālavadaṣṭitarvoḥ .. 31..

bhavāṃ(m)s+ tato'nyo, yadāt+ maparabud+ dhiriyaṃ(m)
vasukā+ lavadaṣ+ ṭitarvoḥ

न्यस्येदमात्मनि जगद् विलयाम्बुमध्ये,
शेषेऽऽत्मना निजसुखानुभवो निरीहः ।
योगेन मीलितदृगात्मनिपीतनिद्रस्-
तुर्ये स्थितो न तु तमो न गुणां(म्)श्च युङ्क्ते ॥ 32॥

nyasyedamātmani jagad vilayāmbumadhye
śeṣe''tmanā nijasukhānubhavo nirīhaḥ .

yogena mīlitadṛgātmanipītanidras-

turye sthito na tu tamo na guṇāṃ(m)śca yuṅkṣe .. 32..

nyasye+ damāt+ mani, vilayām+ bumadhye,

mīlita+ dṛgāt+manipīta+ nidras

तस्यैव ते वपुरिदं(न्) निजकालशक्त्या,

सञ्चोदितप्रकृतिधर्मण आत्मगूढम् ।

अम्भस्यनन्तशयनाद् विरमत्समाधेर्-

नाभेरभूत् स्वकणिकावटवन्महाब्जम् ॥ 33॥

tasyaiva te vapuridaṃ(n) nijakālaśaktyā

sañcoditaprakṛtidharmaṇa ātmagūḍham .

ambhasyanantaśayanād viramatsamādher-

nābherabhūt svakaṇikāvaṭavanmahābjam .. 33..

sañco+ dita+ prakṛti+ dharmaṇa,

ambhas+ yanan+ taśayanād

svakaṇikā+ vaṭavan+ mahābjam

तत्सम्भवः(ख्) कविरतोऽन्यदपश्यमानस्-

त्वां(म्) बीजमात्मनि ततं(म्) स्वबहिर्विचिन्त्य ।

नाविन्ददब्दशतमप्सु निमज्जमानो,

जातेऽङ्कुरे कथमु होपलभेत बीजम् ॥ 34॥

tatsambhavaḥ(kh) kavirato'nyadapaśyamānas-

tvāṃ(m) bījamātmani tataṃ(m) svabahirvicintya .

nāvindadabdaśatamapsu nimajjamāno

jāte'ṅkure kathamu hopalabheta bījam .. 34..

kavi+ rato'n+ yadapaśya+ mānas, svabahir+ vicintya,

nāvinda+ dabda+ śatamapsu

स त्वात्मयोनिरतिविस्मित आस्थितोऽब्जं(ङ्),

कालेन तीव्रतपसा परिशुद्धभावः ।

त्वामात्मनीश भुवि गन्धमिवातिसूक्ष्मं(म्),
भूतेन्द्रियाशयमये विततं(न्) ददर्श ॥ 35॥

sa tvātmayonirativismita āśrito'bjam(ṅ)
kālena tīvratapasā pariśuddhabhāvaḥ .
tvāmātmanīśa bhuvi gandhamivātisūkṣmam(m)
bhūtendriyāśayamaye vitatam(n) dadarśa .. 35..

tvāt+ mayo+ nirati+ vismita, gandhamivā+ tisūkṣmam(m)

एवं(म्) सहस्रवदनाङ्घ्रिशिरः(ख्)करोरु-
नासास्यकर्णनयनाभरणायुधाढ्यम् |
मायामयं(म्) सदुपलक्षितसं(न्)निवेशं(न्),
दृष्ट्वा महापुरुषमाप मुदं(वँ) विरिञ्चः ॥ 36॥

evam(m) sahasravadanāṅghriśiraḥ(kh)karoru-
nāsāsyakarṇanayanābharaṇāyudhāḍhyam
māyāmayam(m) sadupalakṣitasan(n)niveśam(n)
dṛṣṭvā mahāpuruṣamāpa mudam(v̐) viriñcaḥ .. 36..

sahasra+ vadanāṅ+ ghriśiraḥ(kh)+ karoru,
nāsāsya+ karṇa+ nayanā+ bharaṇā+ yudhāḍhyam ,
sadu+ palakṣi+ tasan(n)niveśam(n)

तस्मै भवान्हयशिरस्तनुवं(ञ्) च बिभ्रद्,
वेदद्रुहावतिबलौ मधुकैटभाख्यौ ।
हत्वाऽऽनयच्छ्रुतिगणां(म्)स्तु रजस्तमश्च,
सत्त्वं(न्) तव प्रियतमां(न्) तनुमामनन्ति ॥ 37॥

tasmai bhavānhayaśirastanuvam(ñ) hi bibhrad-
vedadruhāvatibalau madhukaiṭabhākhyau .
hatvā''nayacchrutigaṇām(m)stu rajastamaśca
sattvam(n) tava priyatamām(n) tanumāmananti .. 37..

bhavān+ hayaśiras+ tanuvaṃ(ñ), veda+ druhā+ vatibalau

hatvā''+ nayac+ chruti+ gaṇāṃ(m)stu, tanumā+ mananti

इ*त्थं(न्) नृतिर्यगृषिदेवझषावतारैर्-
लोकान् विभावयसि हं(म्)सि जगत्प्रतीपान् ।
धर्मं(म्) महापुरुष पासि युगानुवृत्तं(ञ्),
छन्नः(ख्) कलौ यदभवस्त्रियुगोऽथ स* त्वम् ॥ 38॥

i*tthaṃ(n) nṛtiryagṛṣidevajhaṣāvatārair-
lokān vibhāvayasi haṃ(m)si jagatpratīpān .
dharmaṃ(m) mahāpuruṣa pāsi yugānuvṛttaṃ(ñ)
channaḥ(kh) kalau yadabhavastriyugo'tha sa* tvam .. 38..

nṛtir+ yagṛṣide+ vajhaṣā+ vatārair,

jagat+ pratīpān, yadabhavas+ triyugo'tha

नैत*न्मन*स्तव कथासु विकु*ण्ठनाथ,
सम्प्रीयते दुरितदु*ष्टमसाधु तीव्रम् ।
कामातुरं(म्) हर्षशोकभयैषणार्तं(न्),
त*स्मि*न्कथं(न्) तव गतिं(वँ्) विमृशामि दीनः ॥ 39॥

naita*nmana*stava kathāsu viku*ṇṭhanātha
samprīyate duritadu*ṣṭamasādhu tīvram .
kāmāturaṃ(m) harṣaśokabhayaiṣaṇārtaṃ(n)
ta*smi*nkathaṃ(n) tava gatiṃ(ṽ) vimṛśāmi dīnaḥ .. 39..

naitan+ manas+ tava, durita+ duṣṭa+ masādhu,

harṣaśoka+ bhayai+ ṣaṇārtaṃ(n)

जिह्वैकतोऽच्युत विकर्षति मावितृ*प्ता,
शि*श्नोऽन्यतस्त्वगुदरं(म्) श्रवणं(ङ्) कुत*श्चित् ।
घ्राणोऽन्यत*श्चपलदृक् क्व च कर्मश*क्तिर्-
बह्व्यः(स्) सपत्न्य इव गेहपतिं(लँ्) लुन*न्ति ॥ 40॥

jihvaikato'cyuta vikarṣati māvitṛ*ptā

*śiśno'nyatastvagudaraṃ(m) śravaṇaṃ(ṅ) kutā*ścit .

ghrāṇo'nyata*ścapaladṛk kva ca karmaśa*ktir-

bahvyaḥ(s) sapatnya iva gehapatiṃ(l) luna*nti .. 40..

jih+ vaikato'+cyuta, śiśno'n+ yatas+ tvagudaraṃ(m),

ghrāṇo'n+ yataś+ capala+ dṛk

एवं(म्) स्वकर्मपतितं(म्) भववैतर*ण्या-

म*न्योन्यज*न्ममरणाशनभीतभीतम् ।

प*श्य*ञ्जनं(म्) स्वपरवि*ग्रहवैरमैत्रं(म्),

ह*न्तेति पारचर पीपृहि मूढम*द्य ॥ 41 ॥

evaṃ(m) svakarmapatitaṃ(m) bhavavaitara*ṇyā-

ma*nyonyaja*nmamaraṇāśanabhītabhītam .

pa*śya*n janaṃ(m) svaparavi*grahavairamaitraṃ(m)

ha*nteti pāracara pīpṛhi mūḍhama*dya .. 41..

manyon+ yajanma+ maraṇā+ śanabhī+ tabhītam

svapa+ ravigrahavai+ ramaitraṃ(m)

को न्व*त्र तेऽखिलगुरो भगवन्प्रयास,

उत्तारणेऽस्य भवस*म्भवलोपहेतोः ।

मूढेषु वै महदनु*ग्रह आर्तब*न्धो,

किं(न्) तेन ते प्रियजनाननुसेवतां(न्) नः ॥ 42 ॥

ko nva*tra te'khilaguro bhagavanprayāsa

uttāraṇe'sya bhavasa*mbhavalopahetoḥ .

mūḍheṣu vai mahadanu*graha ārtaba*ndho

kiṃ(n) tena te priyajanānanusevatāṃ(n) naḥ .. 42..

bhavasam+ bhavalo+ pahetoḥ,

priyajanā+ nanu+ sevatāṃ(n)

नैवोद्विजे पर दुरत्ययवैतरण्यास्-
त्वद्वीर्यगायनमहामृतमग्नचित्तः ।
शोचे ततो विमुखचेतस इन्द्रियार्थ-
मायासुखाय भरमुद्वहतो विमूढान् ॥ 43 ॥

naivodvije para duratyayavaitaraṇyās-
tvadvīryagāyanamahāmṛtamagnacittaḥ .
śoce tato vimukhacetasa indriyārtha-
māyāsukhāya bharamudvahato vimūḍhān .. 43..

durat+ yaya+ vaitaraṇyā,
tvad+ vīryagā+ yanamahā+ mṛtamagna+ cittaḥ , bharamud+ vahato

प्रायेण देव मुनयः(स्) स्वविमुक्तिकामा,
मौनं(ञ्) चरन्ति विजने न परार्थनिष्ठाः ।
नैतान्विहाय कृपणान्विमुमुक्ष एको,
नान्यं(न्) त्वदस्य शरणं(म्) भ्रमतोऽनुपश्ये ॥ 44 ॥

prāyeṇa deva munayaḥ(s) svavimuktikāmāḥ
maunaṃ(ñ) caranti vijane na parārthaniṣṭhāḥ .
naitānvihāya kṛpaṇānvimumukṣa eko
nānyaṃ(n) tvadasya śaraṇaṃ(m) bhramato'nupaśye .. 44..

kṛpaṇān+ vimumukṣa

यन्मैथुनादि गृहमेधिसुखं(म्) हि तुच्छं(ङ्),
कण्डूयनेन करयोरिव दुःखदुःखम् ।
तृप्यन्ति नेह कृपणा बहुदुःखभाजः(ख्),
कण्डूतिवन्मनसिजं(वँ) विषहेत धीरः ॥ 45 ॥

Yanmaithunādi gṛhamedhisukhaṃ(m) hi tucchaṃ(ṅ)
kaṇḍūyanena karayoriva duḥkhaduḥkham .
tṛpyanti neha kṛpaṇā bahuduḥkhabhājaḥ(kh)

kaṇḍūtivanmanasijaṃ(v̐) viṣaheta dhīraḥ .. 45..

kaṇḍū+ tivan+ manasijaṃ(v̐)

मौनव्रतश्रुततपोऽध्ययनस्वधर्म-
व्याख्यारहोजपसमाधय आपवर्ग्याः ।
प्रायः(फ्) परं(म्) पुरुष ते त्वजितेन्द्रियाणां(वँ),
वार्ता भवन्त्युत न वात्र तु दाम्भिकानाम् ॥ 46॥

maunavrataśrutatapo'dhyayanasvadharma-
vyākhyārahojapasamādhaya āpavargyāḥ .
prāyaḥ(kh) paraṃ(m) puruṣa te tvajitendriyāṇāṃ(v̐)
vārtā bhavantyuta na vātra tu dāmbhikānām .. 46..

maunavrataśru+ tatapo'dh+ yayanas+ vadharma

vyākhyā+ raho+ japasamā+ dhaya

रूपे इमे सदसती तव वेदसृष्टे,
बीजाङ्कुराविव न चान्यदरूपकस्य ।
युक्ताः(स्) समक्षमुभयत्र विचिन्वते त्वां(यँ),
योगेन वह्निमिव दारुषु नान्यतः(स्) स्यात् ॥ 47॥

rūpe ime sadasatī tava vedasṛṣṭe
bījāṅkurāviva na cānyadarūpakasya .
yuktāḥ(s) samakṣamubhayatra vicinvate tvāṃ(ỹ)
yogena vahnimiva dāruṣu nānyataḥ(s) syāt .. 47..

bījāṅ+ kurā+ viva, cān+ yadarū+ pakasya,

sama+ kṣamu+ bhayatra

त्वं(वँ) वायुरग्निरवनिर्वियदम्बुमात्राः(फ्),
प्राणेन्द्रियाणि हृदयं(ञ्) चिदनुग्रहश्च ।
सर्वं(न्) त्वमेव सगुणो विगुणश्च भूमन्,
नान्यत् त्वदस्त्यपि मनोवचसा निरुक्तम् ॥ 48॥

tvaṃ(ṽ) vāyur*agniravanirviyad*ambumātrāḥ(ph)
prāṇendriyāṇi hṛdayaṃ(ñ) cidan*ugrah*aśca .
sarvaṃ(n) tvameva saguṇo viguṇ*aśca bhūman
nānyat tvadastyapi manovacasā nir*uktam .. 48..

vāyu+ ragni+ ravanir+ viyadam+ bumātrāḥ(ph), tvadas+ tyapi

नैते गुणा न गुणिनो महदादयो ये,
सर्वे मनः(फ्)प्रभृतयः(स्) सहदेवमर्त्याः ।
आद्य*न्तव*न्त उरुगाय वि*दन्ति हि* त्वा-
मेवं(व्ँ) विमृ*श्य सुधियो विरम*न्ति श*ब्दात् ॥ 49॥

naite guṇā na guṇino mahadādayo ye
sarve manaḥ(ph) prabhṛtayaḥ(s) sahadevamartyāḥ .
ādy*antav*anta urugāya vid*anti hi* tvā-
mevaṃ(ṽ) vimṛ*śya sudhiyo viram*anti ś*abdāt .. 49..

ādyan+ tavanta

तत् तेऽर्हत्तम नमः(स्)स्तुतिकर्मपूजाः(ख्),
कर्म* स्मृति*श्चरणयोः(श्) श्रवणं(ङ्) कथायाम् ।
सं(म्)सेवया त्वयि विनेति षड*ङ्गया किं(म्),
भ*क्तिं(ञ्) जनः(फ्) परमहं(म्)सगतौ लभेत ॥ 50॥

tat terhattama namaḥ(s)stutikarmapūjāḥ(kh)
karm*a smṛt*iścaraṇayoḥ(ś) śravaṇam(ṅ) kathāyām .
saṃ(m)sevayā tvayi vineti ṣaḍ*aṅgayā kiṃ(m)
bh*aktiṃ(ñ) janaḥ(ph) paramahaṃ(m)sagatau labheta .. 50..

terhat+ tama, smṛtiś+ caraṇayoḥ(ś), ṣaḍaṅ+ gayā

नारद उवाच

एताव*द्वर्णितगुणो, भक्त्या भ*क्तेन निर्गुणः ।
प्रह्लादं(म्) प्रणतं(म्) प्रीतो, यतम*न्युरभाषत ॥ 51॥

nārada uvāca

etāvadvarṇitaguṇo, bhaktyā bhaktena nirguṇaḥ .

prahlādaṃ(m) praṇataṃ(m) prīto, yatamanyurabhāṣata .. 51..

etāvad+ varṇita+ guṇo, yata+ manyu+ rabhāṣata

श्रीभगवानुवाच

प्रह्लाद भद्र भद्रं(न्) ते, प्रीतोऽहं(न्) तेऽसुरोत्तम ।

वरं(वँ) वृणीष्वाभिमतं(ङ्), कामपूरोऽस्म्यहं(न्) नृणाम् ॥ 52॥

śrībhagavānuvāca

prahlāda bhadra bhadraṃ(n) te, prīto'haṃ(n) te'surottama .

varaṃ(v̐) vṛṇīṣvābhimataṃ(ṅ), kāmapūro'smyahaṃ(n) nṛṇām .. 52..

vṛṇīṣvā+ bhimataṃ(ṅ), kā+ mapūro's+ myahaṃ(n)

माममप्रीणत आयुष्मन्- दर्शनं(न्) दुर्लभं(म्) हि मे ।

दृष्ट्वा मां(न्) न पुनर्जन्तु- रात्मानं(न्) तप्तुमर्हति ॥ 53॥

māmaprīṇata āyuṣman- darśanaṃ(n) durlabhaṃ(m) hi me .

dṛṣṭvā māṃ(n) na punarjantu- rātmānaṃ(n) taptumarhati .. 53..

tap+ tumarhati

प्रीणन्ति ह्यथ मां(न्) धीराः(स्), सर्वभावेन साधवः ।

श्रेयस्कामा महाभागाः(स्), सर्वासामाशिषां(म्) पतिम् ॥ 54॥

prīṇanti hyatha māṃ(n) dhīrāḥ(s), sarvabhāvena sādhavaḥ .

śreyaskāmā mahābhāgaḥ(s), sarvāsāmāśiṣāṃ(m) patim .. 54..

sarvā+ sāmā+ śiṣāṃ(m)

एवं(म्) प्रलोभ्यमानोऽपि, वरैर्लोकप्रलोभनैः ।

एकान्तित्वाद् भगवति, नैच्छत् तानसुरोत्तमः ॥ 55॥

evaṃ(m) pralobhyamāno'pi, varairlokapralobhanaiḥ .

ekāntitvād bhagavati, naicchat tānasurottamaḥ .. 55..

varair+ loka+ pralobhanaiḥ, ekān+ titvād

इति श्रीमद्भागवते महापुराणे पारमहं(म्)स्यां(म्) सं(म्)हितायां(म्)
सप्तमस्कन्धे प्रह्लादचरिते भगवत्स्तवो नाम नवमोऽध्यायः ॥

iti śrīmadbhāgavate mahāpurāṇe pāramahaṃ(m)syāṃ(m) saṃ(m)hitāyāṃ(m)
saptamaskandhe prahlādacarite, bhagavatstavo nāma navamo'dhyāyaḥ .. 9..

ॐ पूर्णमदः(फ्) पूर्णमिदं(म्)पूर्णात्पूर्णमुदच्यते
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥
ॐ शान्तिः(श्)शान्तिः(श्)शान्तिः ॥

Om Pūrṇamadah(ph) Pūrṇamidaṃ(m) PūrṇātPūrṇamudacyate|
Pūrṇasya Pūrṇamādāya Pūrṇamevāvashiṣyate ||
Om Shāntih(ś) Shāntih(ś) Shāntih ||

